শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীপরমহংসস্বামিব্রহ্মানন্দ ৰিরচিতং

# ॥ শ্রী রমাপত্যষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রমাপত্যষ্টকম্ ॥

জগদাদিমনাদিমজং পুরুষং
শরদম্বরতুল্যতনুং ৱিতনুম্।
ধৃতকঞ্জরথাঙ্গগদং ৱিগদং
প্রণমামি রমাধিপতিং তমহম্॥ **1**॥

কমলাননকঞ্জরতং ৱিরতং
হৃদি যোগিজনৈঃ কলিতং ললিতম্।
কুজনৈঃ সুজনৈরলভং সুলভং
প্রণমামি রমাধিপতিং তমহম্॥ **2**॥

মুনিৱৃন্দহৃদিস্থপদং সুপদং
নিখিলাধ্ৱরভাগভুজং সুভুজম্।
হৃতৱাসৱমুখ্যমদং ৱিমদং
প্রণমামি রমাধিপতিং তমহম্॥ **3**॥

হৃতদানৱদৃপ্তবলং সুবলং
স্বজনাস্তসমস্তমলং ৱিমলম্।
সমপাস্ত গজেন্দ্রদরং সুদরং
প্রণমামি রমাধিপতিং তমহম্॥ **4**॥

পরিকল্পিতসর্ৱকলং ৱিকলং
সকলাগমগীতগুণং ৱিগুণম্।
ভৱপাশনিরাকরণং শরণং
প্রণমামি রমাধিপতিং তমহম্॥ **5**॥

মৃতিজন্মজরাশমনং কমনং
শরণাগতভীতিহরং দহরম্।
পরিতুষ্টরমাহৃদযং সুদযং
প্রণমামি রমাধিপতিং তমহম্॥ **6**॥

সকলাৱনিবিম্বধরং স্বধরং
পরিপূরিতসর্ৱদিশং সুদৃশম্।
গতশোকমশোককরং সুকরং
প্রণমামি রমাধিপতিং তমহম্॥ **7**॥

মথিতার্ণৱরাজরসং সরসং
গ্রথিতাখিললোকহৃদং সুহৃদম্।
প্রথিতাদ্ভুতশক্তিগণং সুগণং
প্রণমামি রমাধিপতিং তমহম্॥ **8**॥

সুখরাশিকরং ভৱবন্ধহরং
পরমাষ্টকমেতদনন্যমতিঃ।
পঠতীহ তু যোঽনিশমেৱ নরো
লভতে খলু ৱিষ্ণুপদং স পরম্॥ **9**॥

॥ ইতি শ্রী রমাপত্যষ্টকং সমাপ্তম্॥